# Skandaproktam Parvagrahanadikale Shivarchanopadesham

# સ્કન્દપ્રોક્તં પર્વગ્રહણાદિકાલે શિવાર્ચનોપદેશમ્

## Document Information

Text title : Skandaproktam Parvagrahanadikale Shivarchanopadesham

File name : skandaproktaMparvagrahaNAdikAleshivArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mahAdevAkhyaH ekAdashamAMshaH | adhyAyaH 27 parva(sUryasoma)grahaNapUjAmahimA | 1-86||

Latest update : October 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 3, 2024

*sanskritdocuments.org*

Skandaproktam Parvagrahanadikale Shivarchanopadesham

# સ્કન્દપ્રોક્તં પર્વગ્રહણાદિકાલે શિવાર્ચનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે મહાદેવાખ્યે)

સ્કન્દ ઉવાચ ।

પુણ્યં પર્વસુ સર્વેષુ ગ્રહણે સોમસૂર્યયોઃ ।
અયને વિષુવે ચૈવ ષડશીતિમુખેષુ ચ ॥ ૧॥

પુરા મન્વાદિષુ મુને પૂર્ણિમામાસુ સર્વદા ।
સઙ્ક્રાન્તિષુ વ્યતીપાતે વૈધૃતૌ ચ વિશેષતઃ ॥ ૨॥

આષાઢે જ્યેષ્ઠશ્રાવણ્યાં માર્ગશીર્ષે ચ ચૈત્રકે ।
માઘ્યાં ચ પૂર્ણિમાયાં તુ શિવપૂજા વિશિષ્યતે ॥ ૩॥

અમા સોમાન્વિતા યા સ્યાત્સર્વમાસેષુ સત્તમ ।
કાર્તિકેઽથ વિશેષેણ પુષ્યાષાઢે મહાફલા ॥ ૪॥

સ્નાનમભ્યર્ચનં શમ્ભોઃ વિશિષ્ટઃ સ્યાત્સદા નૃણામ્ ।
કૃષ્ણપક્ષાષ્ટમી દેવિ (?) ભૂતાપ્યસિતપક્ષકે ॥ ૫॥

(? Skanda was meant to be addressing Muni - Jaigīśavya)

માસિકી શિવરાત્રી ચ પ્રશસ્તા શિવપૂજને ।
યા માઘે કૃષ્ણપક્ષસ્ય ભૂતા સોમાર્ચિતા યદિ ॥ ૬॥

સાર્દ્રા પાતાન્વિતા વાપિ નિશિ શર્વપ્રિયા હિ સા ।
સ યોગો દુર્લભો નૃણાં તત્ર લિઙ્ગોદ્ભવો મુને ॥ ૭॥

એકેન બિલ્વપત્રેણ તસ્યાં પૂજ્ય વિમુક્તિભાક્ ।
યા માઘી શિવરાત્રી ચ મહાપૂર્વા વિશિષ્યતે ॥ ૮॥

ગોકર્ણે સા વિશિષ્યેત તથા વૈ ગન્ધમાદને ।
શ્રીકાલહસ્તિશૈલે ચ શિવરાત્રિર્વિશિષ્યતે ॥ ૯॥

વિષ્ણુબ્રહ્માદયો દેવાઃ પ્રાર્થયન્તિ મુનીશ્વરાઃ ।
કદા ગોકર્ણમેષ્યામઃ શિવરાત્રૌ શિવાર્ચકાઃ ॥ ૧૦॥

ભવિષ્યામો બિલ્વપત્રૈર્દ્વિત્રૈર્વા મુક્તિમાપ્નુમઃ ।
તત્રૈવ સાગરે સ્નાનં ગોકર્ણેશસ્ય પૂજનમ્ ॥ ૧૧॥

શિવરાત્રૌ શિવાર્ચૈષા જન્મનૈકેન મુક્તિદા ।
ગોકર્ણે ચ મુનિશ્રેષ્ઠ શિવક્ષેત્રેષુ પુણ્યદા ॥ ૧૨॥

તસ્યામભ્યર્ચનવિધિં તવાગ્રે કથયામ્યહમ્ ।
કાર્તિકે શ્રાવણે ચૈવ સોમવારો વિશિષ્યતે ॥ ૧૩॥

કૃષ્ણપક્ષેઽપિ ચ મુને સર્વમાસેષુ પુણ્યદઃ ।
ભક્તઃ શિવાર્ચકો નક્તં તસ્મિન્ વ્યક્તં તુ મુક્તિભાક્ ॥ ૧૪॥

સર્વમાસપ્રદોષોઽપિ પ્રશસ્તઃ શિવપૂજને ।
તત્રાપિ દુર્લભો જ્ઞેયો મન્દવારે મહાફલઃ ॥ ૧૫॥

દુર્લભઃ કૃષ્ણપક્ષોત્થઃ શિવપ્રિયતમો મતઃ ।
તત્રૈવાર્ચનમીશસ્ય સર્વસમ્પત્પ્રદાયકમ્ ॥ ૧૬॥

સર્વત્રૈવ શિવાગારે ચરે વા સ્થાવરેઽપિ વા ।
લિઙ્ગેષુ પૂજયા શમ્ભોઃ મુક્તિઃ કરગતા ભવેત્ ॥ ૧૭॥

કિમ્પુનસ્ત્વવિમુક્તેઽથ ત્રિલોચનસમીપતઃ ।
ત્રિલોચનેશ્વરં કાશ્યાં મન્દવારે પ્રદોષકે ॥ ૧૮॥

પૂજ્ય જન્માયુતૈઃ પાપૈર્મુક્તો મુક્તિં ચ વિન્દતિ ।
સ દ્વાદશપ્રદોષાણાં લભેત્ફલમયત્નતઃ ॥ ૧૯॥

મન્દપ્રદોષપૂજાતો લભેદેવ મહામુને ।
એકાદશ્યાં મહાદેવં પૂજ્ય બિલ્વૈર્મનોહરૈઃ ॥ ૨૦॥

સિતાયામસિતાયાં ચ રુદ્રતિથ્યાં મુનીશ્વર ।
ઉપોષ્ય શિવમભ્યર્ચ્ય કૃષ્ણાયાં નક્તભોજનમ્ ॥ ૨૧॥

કુર્યાદેવ શિવે ભક્તો મહાફલ જિગીષયા ।
વિષ્ણુબ્રહ્માદયો દેવા એકાદશ્યાં શિવાર્ચનમ્ ॥ ૨૨॥

કુર્વન્ત્યુપોષણં ભક્ત્યા રુદ્રતિથ્યાં દ્વિજોત્તમ ।
એકાદશાનાં રુદ્રાણાં પ્રીત્યર્થં ગરુડધ્વજઃ ॥ ૨૩॥

પક્ષદ્વયેઽપિ સતતં કરોત્યેકાદશીવ્રતમ્ ।
રુદ્રપ્રિયકરી હ્યેષા કાર્તિકાષાઢગા સિતા ॥ ૨૪॥

વૈશાખ્યાં ચ તથાષાઢ્યાં ચૈત્ર્યાં માઘ્યાં મહેશ્વરમ્ ।
મહાસ્નાનવિધાનેન પૌર્ણમ્યાં સ્નાપયેન્નરઃ ॥ ૨૫॥

પઞ્ચામૃતૈઃ ફલરસૈર્મહાપુણ્યમવાપ્નુયાત્ ।
નીલોત્પલદલૈર્બિલ્વૈઃપૂજયન્ કુસુમૈરપિ ॥ ૨૬॥

સર્વપાપવિનિર્મુક્તઃ અક્ષયાં લભતે ગતિમ્ ।
યો માઘ્યાં કુરુતે ભક્ત્યા શિવાય ઘૃતકમ્બલમ્ ॥ ૨૭॥

સ વંશકોટિસંયુક્તો મોદતે શિવસન્નિધૌ ।
વૈશાખ્યાં પૂર્ણિમાયાં તુ દધિકમ્બલકં નરઃ ॥ ૨૮॥

મહાકૈલાસસદને મદનાન્તરકરપ્રિયે ।
ભવેન્નાવર્તતે વિપ્ર અસ્મિન્ લોકે ધ્રુવં નરઃ ॥ ૨૯॥

ફાલ્ગુન્યામથ પોર્ણમ્યાં મધુકમ્બલદો નરઃ ।
શિવાય વિધિવદ્ ભક્ત્યા ગાણપત્યં લભેન્નરઃ ॥ ૮૦॥

સઙ્ક્રાન્તિષુ શિવં પૂજ્ય કુસુમૈર્બિલ્વપલ્લવૈઃ ।
ક્ષીરેણ મધુના દધ્ના સિતયા ચ ઘૃતૈરપિ ॥ ૩૧॥

અભિષિચ્ય શિવં ભક્ત્યા તૂર્યમઙ્ગલવાદિતૈઃ ।
ધૂપં ચ ગુગ્ગુલું દગ્ધ્વા બ્રહ્મહાપિ વિમુચ્યતે ॥ ૩૨॥

ગચ્છેચ્છિવપુરં રમ્યં વિમાનૈઃ સાર્વગામિકૈઃ ।
શિવં મકરસઙ્ક્રાન્તૌ સ્નાપ્ય પઞ્ચામૃતૈઃ ફલૈઃ ॥ ૩૩॥

તિલાઞ્જલિશતૈઃ પૂજ્ય સુધૌતૈઃ પાણ્ડરૈર્નરઃ ।
બિલ્વપત્રૈઃ સમભ્યર્ચ્ય કૃસરં તિલસંયુતમ્ ॥ ૩૪॥

સાજ્યં નિવેદ્ય સગુડં કૃતકૃત્યો ભવેન્નરઃ ।
હંસકુન્દેન્દુસઙ્કાશૈર્યાનૈર્ગચ્છેચ્છિવાગ્રતઃ ॥ ૩૫॥

ષડશીતિમુખેષ્વીશં પૂજ્ય ભક્ત્યા સકૃન્નરઃ ।
બિલ્વપત્રૈઃ સમભ્યર્ચ્ય ક્ષુદ્રપાપૈઃ પ્રમુચ્યતે ॥ ૩૬॥

યુગાદિષુ મહાદેવં સિચ્ય પઞ્ચામૃતૈઃ ફલૈઃ ।

હવિર્નિવેદ્ય દેવાય સમ્પૂજ્ય કુસુમાક્ષતૈઃ ॥ ૩૭॥

સર્વપાપૈઃ પ્રમુચ્યેત ભક્તો મુક્તિં ચ વિન્દવિ ।
મન્વાદિષુ વિરૂપાક્ષં પૂજ્ય ભક્ત્યા સકૃન્નરઃ ॥ ૩૮॥

વસેચ્છિવપુરે દિવ્યે સર્વભોગસમૃદ્ધિમાન્ ।
વ્યતીપાતે ચ સમ્પૂજ્ય દુગ્ધાજ્યૈઃ બિલ્વસંયુતમ્ ॥ ૩૯॥

માર્ગશીર્ષે વિશેષેણ સફલં તસ્ય જીવિતમ્ ।
અણિમાદિ ગુણૈર્યુક્તઃ શિવવદ્વિચરેચ્છિવે ॥ ૪૦॥

વૈધૃતૌ ચ વિશેષેણ સમ્પૂજ્ય શિવમેવ હિ ।
ક્ષીરાજ્યૈર્બિલ્વપત્રૈશ્ચ નિવેદ્ય ચ હવિર્મુને ॥ ૪૧॥

નિશાકરકરપ્રખ્યૈર્વિમાનૈઃ સાર્વગામિકૈઃ ।
યાન્ત્યેવ સન્નિધૌ શમ્ભોઃ ગણશ્રેષ્ઠોઽમરેડિતઃ ॥ ૪૨॥

સમ્પૂજ્ય દેવં વિપ્રેન્દ્રો યો લિઙ્ગમુદાગાયને ।
પુષ્પૈર્ધૂપૈશ્ચ બિલ્વૈશ્ચ નિવેદ્ય હવિરુત્તમમ્ ॥ ૪૩॥

ભોજયિત્વા મહાશૈવાનેકં વા શિવયોગિનમ્ ।
પ્રયાતિ શિવસારૂપ્યં ગાણપત્યં લભેન્નરઃ ॥ ૪૪॥

સમ્પૂજયન્નરો ભક્ત્યા યો લિઙ્ગં દક્ષિણાયને ।
ધૃતેનૈવાભિષિચ્યેશં બિલ્વૈઃ સમ્પૂજ્ય યત્નતઃ ॥ ૪૫॥

કૃસરં યવસં સક્તું નિવેદ્ય શિવયોગિને ।
ભોજયિત્વા ધૃતાન્નેન સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૪૬॥

સર્વાન્કામાનવાપ્નોતિ યાતિ ચૈવ શિવાલયમ્ ।
અમાસ્વપિ ચ કાર્તિક્યાં બિલ્વૈઃ સોમાન્વિતાસ્વપિ ॥ ૪૭॥

સમ્પૂજ્ય ચ ધૃતૈઃ સ્નાપ્ય લભતે ગતિમુત્તમામ્ ।
નક્તં ભક્તાનો ભક્તો મુક્તિં યાતિ ન સંશયઃ ॥ ૪૮॥

દિવસે તુ સમભ્યર્ચ્ય વારર્ક્ષતિથિષુ ક્રમાત્ ।
એકાહમપિ યો ભક્ત્યા સ મુક્તઃ સર્વપાપ્મભિઃ ॥ ૪૯॥

પ્રાતઃ સમ્પૂજયઁલ્લિઙ્ગે નૈશં પાપં વ્યપોહતિ ।
સઙ્ગવેઽનઙ્ગતાપોત્થં પૂજ્ય લિઙ્ગં સકૃન્નરઃ ॥ ૫૦॥

પાપકઞ્ચુકમુત્સૃજ્ય શિવલોકે મહીયતે ।
અપરાહ્ને શિવં પૂજ્ય ગર્ભભાઙ્નૈવ જાયતે ॥ ૫૧॥

મધ્યાહ્ને હયમેધસ્ય ફલં સમ્પૂજકો લભેત્ ।
સાયઙ્કાલે શિવં પૂજ્ય સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૫૨॥

નિશીથે મન્મથારાતિં પૂજ્ય બિલ્વૈર્નપાપભાક્ ।
અરુણોદયવેલાયાં પૂજ્ય દેવં ઋણી ન તુ ॥ ૫૩॥

ષટ્કાલં પૂજયેલ્લિઙ્ગં ત્રિકાલં વા દ્વિકાલતઃ ।
એકકાલં મુને ભક્ત્યા સ રુદ્રો નાત્ર સંશયઃ ॥ ૫૪॥

પ્રહરે પ્રહરે નિત્યં હરમેવ સમર્ચયેત્ ।
યતો નિત્યં જીવિતં હિ નાશ્વસેત્ક્ષણમત્ર હિ ॥ ૫૫॥

યઃ સપ્તમી પ્રદોષેષુ શિવલિઙ્ગં સમર્ચયેત્ ।
બિલ્વપત્રૈશ્ચ કુસુમૈઃ ન તિર્યગ્યોનિમાપ્નુયાત્ ॥ ૫૬॥

ચતુર્થ્યાં તુ પ્રદોષેષુ પૂજયિત્વેન્દુદર્શને ।
શિવલિઙ્ગં બિલ્વપત્રૈર્ન દુર્ગતિમવાપ્નુયાત્ ॥ ૫૭॥

સ પ્રદોષસ્ત્રિધા પ્રોક્તઃ શિવેન પરમાત્મના ।
માહેશ્વરસ્ત્રયોદશ્યાં સપ્તમ્યાં ચ મહામુને ॥ ૫૮॥

સારસ્વતસ્તતો વિપ્ર ચતુર્થ્યાં ચ ગણાધિપઃ ।
સર્વેષ્વપિ પ્રદોષેષુ પૂજ્ય એવ મહેશ્વરઃ ॥ ૫૯॥

માહેશ્વરસ્ત્રયોદશ્યાં પ્રદોષઃ સાર્વમાસિકઃ ।
તસ્મિન્નભ્યર્ચનં શમ્ભોરનન્તફલદં મુને ॥ ૬૦॥

મન્દારયુતો યઃ સ્યાત્પ્રદોષો રજનીમુખે ।
તત્રાપિ કૃષ્ણપક્ષે ચ પ્રાપ્તો દૈવેન લભ્યતે ॥ ૬૧॥

તસ્મિન્પ્રદોષે લિઙ્ગાર્ચા દોષાદ્રિભિદુરા ભવેત્ ।
ગ્રહણે સોમસૂર્યાણાં સ્નાનદાનાર્ચનં વિભોઃ ॥ ૬૨॥

કુર્યાજ્જપં ચ મન્ત્રાણાં તસ્મિન્ કાલે ચ સિદ્ધયે ।
સૂર્યગ્રહે કુરુક્ષેત્રે સ્નાનં દાનં શિવાર્ચનમ્ ॥ ૬૩॥

પ્રશસ્યતે મુનિશ્રેષ્ઠ પુષ્કરે તુ શશિગ્રહે ।
યમુનાગઙ્ગયોઃ સન્ધૌ ગઙ્ગાસાગરસઙ્ગમે ॥ ૬૪॥

ઓઙ્કારે ભૃગુતુઙ્ગે ચ તથૈવામરકણ્ટકે ।
નર્મદાસાગરોપાન્તે ગોકર્ણે પશ્ચિમામ્બુધૌ ॥ ૬૫॥

કાવેર્યુદધિ સઙ્ગે ચ તામ્રાસાગરસઙ્ગમે ।
ધનુષ્કોટૌ મુનિશ્રેષ્ઠ કન્યાતીર્થનિમજ્જનાત્ ॥ ૬૬॥

સૂર્યેન્દુગ્રહણે પુણ્યે સ્નાને તેષુ પ્રશસ્યતે ।
વિધિં ચ તે પ્રવક્ષ્યામિ સૂર્યેન્દ્વોર્ગ્રહણે મુને ॥ ૬૭॥

નિત્યે નૈમિત્તિકે કામ્યે જપહોમાનુમજ્જને ।
શિવાર્ચને ચ વિધિવન્મહાદાનમનન્તકમ્ ॥ ૬૮॥

કૂપાચ્છતગુણં વાપ્યાં નદ્યાં સ્નાનં તતોઽધિકમ્ ।
સાગરેઽપિ તતો વિપ્ર નદીસઙ્ગે તતોઽધિકમ્ ॥ ૬૯॥

શિવસ્ય સન્નિધૌ સ્નાનં તતોઽપિ ગુણવત્તરમ્ ।
અતુલઃ કોષ્ણતોયેન સ્નાયાદ્ગ્રહણયોર્દ્વયોઃ ॥ ૭૦॥

વૈષ્ણવાન્ સ્કાન્દગાણેશાન્ શૈવાઞ્છાક્તાન્ જપેન્મનૂન્ ।
મન્ત્રસઙ્ગ્રહણં કુર્યાદ્ગ્રહણે સોમસૂર્યયોઃ ॥ ૭૧॥

એકાવૃત્ત્યાપિ મન્ત્રાણાં લક્ષાવૃત્તિફલં લભેત્ ।
પિતૄન્ સન્તર્પયેચ્છ્રાદ્ધૈર્નક્તં ચાપિ મુનીશ્વર ॥ ૭૨॥

સર્વં ગઙ્ગાસમં તોયં સર્વે શિવસમા દ્વિજાઃ ।
સર્વં મેરુસમં દાનં ગ્રહણે સોમસૂર્યયોઃ ॥ ૭૩॥

મન્ત્રસિદ્ધિકરં સ્થાનં નદ્યાં પર્વતમસ્તકે ।
વિપિને ચ શિવાગારે દેવબ્રાહ્મણસન્નિધૌ ॥ ૭૪॥

બિલ્વમૂલે બિલ્વપત્રૈર્ગ્રહણે લિઙ્ગમર્ચયન્ ।
તત્ર સમ્પૂજયન્ લભ્યેત્ ફલં તલ્લક્ષહાયનમ્ ॥ ૭૫॥

રુદ્રેણ ચૈવ ગાયત્ર્યા તથા પઞ્ચાક્ષરેણ ચ ।
રોગાર્ત આયુષો વૃદ્ધ્યૈ હોમયેચ્ચ ગલૂચિભિઃ ॥ ૭૬॥

સહસ્રં પરમં શ્રેષ્ઠં શતાષ્ટોત્તરમેવ વા ।
નદીતોયેન સમ્પૂર્ણઘટં સંસ્પૃશ્ય શોભનમ્ ॥ ૭૭॥

રુદ્રાવૃત્ત્યા જલૈઃ સ્નાપ્ય રોગૈઃ પાપૈઃ પ્રમુચ્યતે ।

મન્ત્રાન્ પઞ્ચાક્ષરં વાપિ ગાયત્રીં વેદમાતરમ્ ॥ ૭૮॥

યાવદ્ગ્રહણમોક્ષં તુ તાવન્નદ્યાં સમાહિતઃ ।
જપેત્સમુદ્રગામિન્યાં પુરશ્ચર્યાફલં લભેત્ ॥ ૭૯॥

ચરે વા સ્થાવરે વાપિ તુઙ્ગે લિઙ્ગે શિવાર્ચકઃ ।
ગ્રહણે સોમસૂર્યાણાં યો મહાસ્નાનકારકઃ ॥ ૮૦॥

પઞ્ચામૃતૈઃ પઞ્ચગવ્યૈસ્તથા ફલરસૈરપિ ।
ઘૃતાભ્યઙ્ગો ઘૃતસ્નાનં ગ્રહણેઽતીવ પુણ્યદમ્ ॥ ૮૧॥

શિવસ્ય તોષદં વિપ્ર ગાણપત્યપ્રદં પરમ્ ।
તૌર્યત્રિકં ધૂપદીપ પુષ્પગન્ધાનુલેપનમ્ ॥ ૮૨॥

બિલ્વમાલાર્ચનં શમ્ભોઃ પુણ્યં નીરાજનં વિભોઃ ।
કુર્યાદ્યો ગ્રહણે વિપ્ર સર્વાન્કામાનવાપ્નુયાત્ ॥ ૮૩॥

કશ્ચિત્પૂજયતે ભક્ત્યા કશ્ચિત્પૂજાં પ્રપશ્યતિ ।
તયોઃ સમફલં જ્ઞેયં ગ્રહણે લિઙ્ગદર્શનાત્ ॥ ૮૪॥

બ્રહ્મહત્યાદિભિઃ પાપૈર્મુચ્યતે નાત્ર સંશયઃ ॥ ૮૫॥

સઙ્ક્રાન્તિષુ શ્રીશિવમર્ચ્ય લોકે
નૈવાપ્નુયાત્ક્રાન્તિરુજં જનિં વા ।
પતેત્તથા નો નિરયેઽધૃતિં વૈ-
ધૃતીષુ સમ્પૂજ્ય શિવં લભેત ॥ ૮૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તં પર્વગ્રહણાદિકાલે શિવાર્ચનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । મહાદેવાખ્યઃ એકાદશમાંશઃ । અધ્યાયઃ ૨૭ પર્વ(સૂર્યસોમ)ગ્રહણપૂજામહિમા । ૧-૮૬॥

- .. shrIshivarahasyam . mahAdevAkhyaH ekAdashamAMshaH . adhyAyaH 27 parva(sUryasoma)grahaNapUjAmahimA . 1-86..

Notes:

Skanda સ્કન્દ delivers Upadeśa ઉપદેશ about worshiping Śiva શિવ during Parva પર્વ including Soma and Sūrya Grahaṇa સોમસૂર્યગ્રહણ, Ayana અયન, Viṣuva વિષુવ and Saṅkrānti સઙ્ક્રાન્તિ - especially those of Ṣaḍaśītimukha ષડશીતિમુખ and Makara મકર; during various tithi-s તિથિઃ especially Pūrṇima પૂર્ણિમા, Krṣṇa Aṣṭamī કૃષ્ણ અષ્ટમી, Trayodashi ત્રયોદશી, etc. of various

and specific māsa માસ; during Amāvasyā અમાવસ્યા especially of Somavāra સોમવાર; during yoga યોગ like Vyatipāta વ્યતિપાત - especially Sārdrāpāta સાદ્રાપાત; during Māsika Śivarātri માસિક શિવરાત્રિ; during Pradoṣa પ્રદોષ - especially those of Mandavāra મન્દવાર, Caturthī ચતુર્થી, Saptamī સપ્તમી, Ekādaśī એકાદશી (Rudratithi-s રુદ્રતિથિઃ) and Trayodashi ત્રયોદશી.

He also mentions about specific offerings for various such observations, including Ghṛtakambalam ઘૃતકમ્બલમ્ on Māgha Pūrṇimā માઘ પૂર્ણિમા, Dadhikambalam દધિકમ્બલમ્ on Vaiśakha Pūrṇimā વૈશાખ પૂર્ણિમા, Madhukambalam મધુકમ્બલમ્ on Phālguna Pūrṇimā ફાલ્ગુન પૂર્ણિમા; Tilāñjali તિલાઞ્જલિ, Kṛsaram કૃસરમ્ etc. on Makara Saṅkrānti મકર સઙ્ક્રાન્તિ; Pañcāmṛtam પઞ્ચામૃતમ્ on Yugādi યુગાદિ etc.

Proofread by Ruma Dewan

*Skandaproktam Parvagrahanadikale Shivarchanopadesham*

pdf was typeset on November 3, 2024

Please send corrections to *sanskrit@cheerful.com*